# Abstract No 05

## श्री लंकातिथिसत्कारविषये भारतीयाभासः

मतुवेलग्रामजे विजितसिरि नाम भिक्षुः - कल्याणी विश्वविद्यालये संस्कृत- विभागे विद्यार्थी
marthuwelavijithasiri@gmail.com

जगदनेकभाषासु संस्कृतमतिपौराणिकभाषा भवति। ऋग्वेदात् प्रभृति काव्यनाटकाख्यानाख्यायिकेतिहास - पुराणादिनानाविषयेषु दृश्यन्ते। तेष्वतिथिसत्कारमत्युत्कृष्तृचरित्रमिति लोके विश्रुतम्। अस्याध्यनस्यपरमार्थः खलु श्री लंकातिथिसत्कारविषये भारतीयाभासं वर्णितुम् भवति। ऋग्वेदात् प्रभृति सकलसंस्कृतसाहित्येऽतिथिश्ब्दः तस्य पर्याय नामानि च दृश्यन्ते। तेष्वातिथिपर्यटकाभ्यागतादिपर्यायनामानि प्रचलितानि। अतिथिशब्दस्य द्वावर्थौ विद्येते। अ इति नास्त्यर्तद्योतकोपसर्गं भवति। तिथि श्ब्दः कालपर्याय नामम् भवति। यः निश्चितसमयेन विना अकस्मात् गृहम् एति तथा अकस्मात् याति सोऽतिथीति कथ्यते।अतिथिशब्दस्य द्वितीयनिर्वचनं च अस्ति। अट् इति गमनार्थवाचकधातुः भवति। यः यत्र दीर्घकालं न वसति सोऽपि अतिथीति कथ्यते। एकरात्रं तु निवसनातिथिः ब्राह्मण स्मृतः। -अनित्यं हि स्तिथौ यस्मात् तस्मादतिथिरुच्यते॥ यथा मनुस्मृत्यौ उक्तं तथा यः यत्र दीर्घकालं न वसति यत्र तत्र गच्छति स चातिथीति। अन्यस्मिन् स्मृतिग्रन्थेऽपि एवं निर्वचम् अस्ति। यस्य न ज्ञायते नामं न च गोत्रे न च तिथिः। - अकस्मात् गृहमायातः सोऽतिथि प्रोच्यतेबुधैः॥ अभ्यागतः नाम कस्यचिदाराधनं लब्ध्वा गृहं प्रप्नोति सः अभ्यागतः भवति। योऽस्वादार्थं यत्र तत्राटति स यात्रिकः वा पर्यटकः वा भवति। इमे सर्वे आगन्तुकपर्यायनाम भवति। ऋग्वेदे पञ्चममण्डले पञ्चाशीतिमे सूक्ते सत्तमश्लोके आगन्तुकसत्कारं विद्यते। तत्र योऽतिथिसत्कारमकृत्वा देवेभ्यः शरणं याचते। तस्मात् भरतीयागन्तुकसत्कारं ऋग्वैदिककालेऽपि प्रचलितः बभूव इति प्रत्यक्षम्। आरण्यकसहित्यागतातिथिदेवोभवेति प्रकाशम् लोकातिथिसत्कारविशये वरिष्टोपदेशं। तथा उपनिशसाहित्ये च ननवृत्तन्ननि दृष्यते। वेदांगसहित्ये शोडशोपचार नाम्ना शोडषविधातिथ्युपचरानि वर्तन्ते। इत्यादि वैदिकसहित्यागतकारणाणी पश्चात्कले स्मृतिग्रन्तेषु लिखितानि। निदर्शनवशेन मनुस्मृत्यौ तृतीयाध्याये आगन्तुकसत्कारं तस्य फलानि तथा अगन्तुकसत्काराकृते विपाकं च वर्णयति। तथा उपदेशसहित्ये च। इत्यादिकारणविश्लेषणेन सर्वे यथाशक्तिरागन्तुकसत्कारं कर्तुमुत्सुकाः भवितव्यमिति प्रत्यक्षं। तस्याभसोऽद्यपि लंकातिथिसत्कारविषये च दृष्यन्ते। वर्तमानेऽपि भिक्षुगृहप्रवेशपूर्वात् पाददोवनं करोति। अतीते समन्यजनसमजेऽपि आसीत्। वेदाङ्गे शोडषोपचारेसु अतिथिस्वगतार्थे पुष्पदामपिलन्धनमासनाहरपानदिदाननि उक्तप्रकारेण लंकायां च तथैव करोति। तथापि श्री लंकातिथिसत्कारविसये किंचिद्विसदृषताम् वर्तते। यथोक्तातिथिशब्दस्य विग्रहानुरुपेण अतिथिः इति अज्ञातः इति उक्तं। तस्मात् वर्तमाने अज्ञातऽतिथिरिति न सर्वे मन्यन्ते। तथापि ज्ञातिमित्रदयः अतिथीति मन्यन्ते। तत् न अतिथिसत्कारः। केवलं ज्ञातिमित्रसंग्रहं भवति। तथपि तत्रापि लांकिकाः सम्यक् सत्कारं करोति। तस्मात् श्री लंकातिथिसत्कारविषये भारतीयाभसम् प्रत्यक्षम् इत्यत्र निगमनः भवति।

कुञ्चिका पदानि: *अतिथिशब्दस्य निर्वचनानि, अतिथिसत्कारम्, श्री लंकतिथिसत्कार।*